श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्री गरुडपुराणे

# ॥ श्री सुदर्शनस्तुतिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री सुदर्शनस्तुतिः ॥

हरिरुवाच
नमः सुदर्शनायैव सहस्रादित्यवर्चसे।
ज्वालामालाप्रदीप्ताय सहस्राराय चक्षुषे ॥ 1 ॥

सर्वदुष्टविनाशाय सर्वपातकमर्दिने।
सुचक्राय विचक्राय सर्वमन्त्रविभेदिने ॥ 2 ॥

प्रसवित्रे जगद्धात्रे जगद्विध्वंसिने नमः।
पालनार्थाय लोकानां दुष्टासुरविनाशिने ॥ 3 ॥

उग्राय चैव सौम्याय चण्डाय च नमो नमः।
नमश्चक्षुःस्वरूपाय संसारभयभेदिने ॥ 4 ॥

मायापञ्जरभेत्रे च शिवाय च नमो नमः।
ग्रहातिग्रहरूपाय ग्रहाणां पतये नमः ॥ 5 ॥

कालाय मृत्यवे चैव भीमाय च नमो नमः।
भक्तानुग्रहदात्रे च भक्तगोप्त्रे नमो नमः ॥ 6 ॥

विष्णुरूपाय शान्ताय चायुधानां धराय च।
विष्णुशस्त्राय चक्राय नमो भूयो नमो नमः ॥ 7 ॥

इति स्तोत्रं महापुण्यं चक्रस्य तव कीर्तितम्।
यः पठेत्परया भक्त्या विष्णुलोकं स गच्छति ॥ 8 ॥

चक्रपूजाविधिं यश्च पठेद्रुद्र जितेन्द्रियः।
स पापं भस्मसात्कृत्वा विष्णुलोकाय कल्पते॥ 9॥

॥ इति श्री सुदर्शनस्तुतिः समाप्ता॥